# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – आचार्यः | प्रश्नपत्रम् – ४ | गुणाः – ५० |
| विषयः – नव्यव्याकरणम् | सत्रम् – २ | समयः – २:०० तः ४:०० |
| दिनाङ्कः – १६/०७/२०२१ | सन्दर्भग्रन्थः – लघुशब्देन्दुशेखरः (षड्-लिङ्गप्रकरणम्) | |

सूचना - निम्नलिखितेषु एकादशसु प्रश्नेषु केषाञ्चित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

प्रश्नः १ निम्नलिखितेषु सूत्रेषु किमपि सूत्रद्वयं स्वपाठ्यपुस्तकानुसारं व्याख्येयम्। १०

१ न विभक्तौ तुस्माः

२ अट्कुप्वाङ्नुम्व्यवायेऽपि

३ आदेशप्रत्यययोः

४ घेर्ङिति

प्रश्नः २ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् सूत्रस्य लघुशब्देन्दुशेखरानुसारं व्याख्या कार्या। १०

प्रश्नः ३ ङ्याप्प्रातिपदिकात् सूत्रस्य लघुशब्देन्दुशेखरानुसारं व्याख्या कार्या। १०

प्रश्नः ४ ङिति ह्रस्वश्च सूत्रस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या। १०

प्रश्नः ५ अतोऽम् सूत्रमिदं स्वपाठ्यपुस्तकानुसारं व्याख्येयम्। १०

प्रश्नः ६ निम्नलिखितेषु द्वयोः सूत्रयोः यथाग्रन्थं व्याख्या कार्या। १०

१ हो ढः

२ सम्प्रसारणाच्च

३ न संयोगाद्वमन्तात्

४ ष्णान्ता षट्

प्रश्नः ७ दादेर्धातोर्घः सूत्रमिदं यथाग्रन्थं व्याख्येयम्।

प्रश्नः ८ इग्यणः सम्प्रसारणम् सूत्रमिदं यथाग्रन्थं व्याख्येयम्।

प्रश्नः ९ नहो धः सूत्रस्य लघुशब्देन्दुशेखरानुसारं व्याख्या कार्या।

प्रश्नः१० शप्श्यनोर्नित्यम् सूत्रस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या।

**प्रश्नः११ निम्नलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तरं देयम्।**

१ नागेशभट्टानुसारम् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" सूत्रे 'प्रत्ययान्तं वर्जयित्वा' इत्यस्य आवश्यकता विद्यते/ न विद्यते?

२ "कृत्तद्धितसमासाश्च" सूत्रे समासग्रहणं किमर्थमस्ति?

३ आटच्-प्रत्यये चकारस्य इत्संज्ञा "चुटू" सूत्रेण भवति/न भवति?

४ सम्बुद्धि-संज्ञा केन सूत्रेण भवति?

५ रमा इत्यत्र टाप्-प्रत्ययः कस्मात् प्रातिपदिकात् भवति?

६ हे रमा सु इत्यत्र आकारस्य स्थाने एत्वं केन सूत्रेण भवति?

७ "यस्येति च" सूत्रेण कयोः वर्णयोः लोपो भवति?

८ "इकोऽचि विभक्तौ" सूत्रेण कः आगमो भवति?

९ 'दामलिट्' इत्यत्र को धातुः?

१० वकारस्य स्थाने किं सम्प्रसारणं भवति?

११ "दिव औत्" सूत्रे 'औत्' इत्यत्र तकारस्य अपहारः नागेशभट्टानुसारं कथं भवति?

१२ 'प्रशान्' इत्यत्र शम्-धातोः कः प्रत्ययो भवति?

१३ "अपो भि" सूत्रेण किं कार्यं भवति?

१४ "यः सौ" सूत्रेण किं कार्यं भवति?

१५ 'स्रग्विन्' इत्यत्र कः प्रत्ययः?

***